महर्षि व्यास कृत

# महाभारत

## (महाप्रस्थानिक पर्व)




Sanskrit text of Ved Vyas's

# Mahābhārat

## (17. Mahaprasthanik Parva)

## MAHABHARATA : AN INTRODUCTION

Mahabharat, which literally means 'the great story of Bharat dynasty' is part of the Hindu *Itihās*, i.e. 'that which happened'. It is an extraordinary story of sibling rivalry, diplomatic maneuvering and shifting of human values culminating in a direct confrontation on the battlefield of Kurukshetra between five sons of King Pandu (Pandavas) and hundred sons of King Dhritarastra (Kauravas). It's a tale of tragic war which pitted brothers against brothers, sons against fathers and students against teachers. Exceptional characters, in-depth and complex set of interwoven relationships and dramatization on a grand scale makes this epic a memorable one. It's also a saga which marks the end of an era (dvapar Yuga) wherein characters lived up to morals, values and principles to the beginning of an era (Kali Yuga), wherein selfishness, deceit and immorality rules the reins.

Besides compelling drama and riveting plot, Mahabharata is unique in many ways. Larger than life characters including that of Lord Krishna, considered as an incarnation of Lord Vishnu; Bhisma - great grandfather of principle warriors, who pledged to serve the kingdom of Hastinapur and ended up being a silent witness of its fall; Arjuna - unparalleled archer of that time, who laid down his arms at the beginning of the war; Karna - son of Kunti who ended up on the enemy camp due to misfortune; Yudhisthir - an icon of truth who was compelled to lie to win over the battle; Duryodhan - son of blind king whose unending ambitions became the root cause of trouble; Dronacharya - accomplished teacher of that time, who was forced to fight against his favorite student Arjuna...all make this epic spectacular and fascinating.

Every single incident of Mahabharata is full of twists and turns - whether be it the game of dice between brothers or be it the 13 years exile of Pandavas in the forest with a condition of anonymity for the last year, or be it a mysterious fire in the house of wax and Pandava's miraculous escape thereof or be it the laying down of arms by dishearten Arjuna in the battlefield, which resulted in delivery of the message of Bhagavad-Gita (song of the supreme) by Lord Krishna or be it the deftness of Krishna in navigating Pandavas to victory and beyond. In a way, Ramayana and Mahabharata form the very basis of cultural consciousness that symbolize Hinduism. It's not a surprise that Mahabharata has attracted tremendous interest among literates and common man alike of India or East Asia but pundits and philosophers all over the world.

A timeless creation of **Sage Ved Vyasa** (who himself is one of the character of this epic) and one of the longest poem of all times, Mahabharata is divided into eighteen books or chapters (called Parvas) namely 01. Adi Parva; 02. Sabha Parva; 03. Aranyak Parva or Van Parva; 04. Virat Parva; 05. Udyog Parva; 06. Bhishma Parva; 07. Drona Parva; 08. Karna Parva; 09. Shalya Parva; 10. Sauptika Parva; 11. Stri Parva; 12. Shanti Parva; 13. Anushashana Parva; 14. Ashwamegha Parva; 15. Ashramvasik Parva; 16. Musala Parva; 17. Mahaprasthanika Parva and 18. Swargarohan Parva.

It is interesting to note that Bhagavad-Gita, most sacred text of Hindus having great philosophical impact, is part of Mahabharata (Bhishma Parva). Similarly, Vishnu Sahasranama, the most famous hymn of Lord Vishnu containing thousand names of the Supreme is part of Anusashana Parva. Other principal stories that are part of Mahabharata includes the life and works of Lord Krishna (Krishnavatar) woven throughout various chapters of Mahabharata, the love story of Nala and Damayanti as well as an abbreviated Ramayana in Aranyak Parva.

Here, you will find the Sanskrit text of Mahaprasthanik Parva, $17^{th}$ chapter of Mahabharata. To read principal stories of Mahabharata in Gujarati, please visit www.swargarohan.org, where you will also find exclusive reference on Characters of Mahabharata [Glossary section].

☼ ☼ ☼ ☼ ☼

## १. जनमेजय उवाच

एवं वृष्ण्यन्धककुले श्रुत्वा मौसलमाहवम् ।
पाण्डवाः किमकुर्वन्त तथा कृष्णे दिवं गते ॥०१॥

### वैशंपायन उवाच

श्रुत्वैव कौरवो राजा वृष्णीनां कदनं महत् ।
प्रस्थाने मतिमाधाय वाक्यमर्जुनमब्रवीत् ॥०२॥
कालः पचति भूतानि सर्वाण्येव महामते ।
कर्मन्यासमहं मन्ये त्वमपि द्रष्टुमर्हसि ॥०३॥
इत्युक्तः स तु कौन्तेयः कालः काल इति ब्रुवन् ।
अन्वपद्यत तद्वाक्यं भ्रातुर्ज्येष्ठस्य वीर्यवान् ॥०४॥
अर्जुनस्य मतं ज्ञात्वा भीमसेनो यमौ तथा ।
अन्वपद्यन्त तद्वाक्यं यदुक्तं सव्यसाचिना ॥०५॥
ततो युयुत्सुमानाय्य प्रव्रजन्धर्मकाम्यया ।
राज्यं परिददौ सर्वं वैश्यापुत्रे युधिष्ठिरः ॥०६॥
अभिषिच्य स्वराज्ये तु तं राजानं परिक्षितम् ।
दुःखार्तश्चाब्रवीद्राजा सुभद्रां पाण्डवाग्रजः ॥०७॥
एष पुत्रस्य ते पुत्रः कुरुराजो भविष्यति ।
यदूनां परिशेषश्च वज्रो राजा कृतश्च ह ॥०८॥
परिक्षिद्धास्तिनपुरे शक्रप्रस्थे तु यादवः ।
वज्रो राजा त्वया रक्ष्यो मा चाधर्मे मनः कृथाः ॥०९॥
इत्युक्त्वा धर्मराजः स वासुदेवस्य धीमतः ।
मातुलस्य च वृद्धस्य रामादीनां तथैव च ॥१०॥
मातृभिः सह धर्मात्मा कृत्वोदकमतन्द्रितः ।
श्राद्धान्युद्दिश्य सर्वेषां चकार विधिवत्तदा ॥११॥
ददौ रत्नानि वासांसि ग्रामानश्वान्रथानपि ।
स्त्रियश्च द्विजमुख्येभ्यो गवां शतसहस्रशः ॥१२॥
कृपमभ्यर्च्य च गुरुमर्थमानपुरस्कृतम् ।
शिष्यं परिक्षितं तस्मै ददौ भरतसत्तमः ॥१३॥
ततस्तु प्रकृतीः सर्वाः समानाय्य युधिष्ठिरः ।
सर्वमाचष्ट राजर्षिश्चिकीर्षितमथात्मनः ॥१४॥
ते श्रुत्वैव वचस्तस्य पौरजानपदा जनाः ।

भृशमुद्विग्नमनसो नाभ्यनन्दन्त तद्वचः ॥१५॥
नैवं कर्तव्यमिति ते तदोचुस्ते नराधिपम् ।
न च राजा तथाकार्षीत्कालपर्यायधर्मवित् ॥१६॥
ततोऽनुमान्य धर्मात्मा पौरजानपदं जनम् ।
गमनाय मतिं चक्रे भ्रातरश्चास्य ते तदा ॥१७॥
ततः स राजा कौरव्यो धर्मपुत्रो युधिष्ठिरः ।
उत्सृज्याभरणान्यङ्गाज्जगृहे वल्कलान्युत ॥१८॥
भीमार्जुनौ यमौ चैव द्रौपदी च यशस्विनी ।
तथैव सर्वे जगृहुर्वल्कलानि जनाधिप ॥१९॥
विधिवत्कारयित्वेष्टिं नैष्ठिकीं भरतर्षभ ।
समुत्सृज्याप्सु सर्वेऽग्नीन्प्रतस्थुर्नरपुंगवाः ॥२०॥
ततः प्ररुरुदुः सर्वाः स्त्रियो दृष्ट्वा नरर्षभान् ।
प्रस्थितान्द्रौपदीषष्ठान्पुरा द्यूतजितान्यथा ॥२१॥
हर्षोऽभवच्च सर्वेषां भ्रातॄणां गमनं प्रति ।
युधिष्ठिरमतं ज्ञात्वा वृष्णिक्षयमवेक्ष्य च ॥२२॥
भ्रातरः पञ्च कृष्णा च षष्ठी श्वा चैव सप्तमः ।
आत्मना सप्तमो राजा निर्ययौ गजसाह्वयात् ।
पौरैरनुगतो दूरं सर्वैरन्तःपुरैस्तथा ॥२३॥
न चैनमशकत्कश्चिन्निवर्तस्वेति भाषितुम् ।
न्यवर्तन्त ततः सर्वे नरा नगरवासिनः ॥२४॥
कृपप्रभृतयश्चैव युयुत्सुं पर्यवारयन् ।
विवेश गङ्गां कौरव्य उलूपी भुजगात्मजा ॥२५॥
चित्राङ्गदा ययौ चापि मणिपूरपुरं प्रति ।
शिष्टाः परिक्षितं त्वन्या मातरः पर्यवारयन् ॥२६॥
पाण्डवाश्च महात्मानो द्रौपदी च यशस्विनी ।
कृतोपवासाः कौरव्य प्रययुः प्राङ्मुखास्ततः ॥२७॥
योगयुक्ता महात्मानस्त्यागधर्ममुपेयुषः ।
अभिजग्मुर्बहून्देशान्सरितः पर्वतांस्तथा ॥२८॥
युधिष्ठिरो ययावग्रे भीमस्तु तदनन्तरम् ।
अर्जुनस्तस्य चान्वेव यमौ चैव यथाक्रमम् ॥२९॥
पृष्ठतस्तु वरारोहा श्यामा पद्मदलेक्षणा ।
द्रौपदी योषितां श्रेष्ठा ययौ भरतसत्तम ॥३०॥

श्वा चैवानुययावेकः पाण्डवान्प्रस्थितान्वने ।
क्रमेण ते ययुर्वीरा लौहित्यं सलिलार्णवम् ॥३१॥
गाण्डीवं च धनुर्दिव्यं न मुमोच धनंजयः ।
रत्नलोभान्महाराज तौ चाक्षय्यौ महेषुधी ॥३२॥
अग्निं ते ददृशुस्तत्र स्थितं शैलमिवाग्रतः ।
मार्गमावृत्य तिष्ठन्तं साक्षात्पुरुषविग्रहम् ॥३३॥
ततो देवः स सप्तार्चिः पाण्डवानिदमब्रवीत् ।
भो भो पाण्डुसुता वीराः पावकं मां विबोधत ॥३४॥
युधिष्ठिर महाबाहो भीमसेन परंतप ।
अर्जुनाश्विसुतौ वीरौ निबोधत वचो मम ॥३५॥
अहमग्निः कुरुश्रेष्ठा मया दग्धं च खाण्डवम् ।
अर्जुनस्य प्रभावेण तथा नारायणस्य च ॥३६॥
अयं वः फल्गुनो भ्राता गाण्डीवं परमायुधम् ।
परित्यज्य वनं यातु नानेनार्थोऽस्ति कश्चन ॥३७॥
चक्ररत्नं तु यत्कृष्णे स्थितमासीन्महात्मनि ।
गतं तच्च पुनर्हस्ते कालेनैष्यति तस्य ह ॥३८॥
वरुणादाहृतं पूर्वं मयैतत्पार्थकारणात् ।
गाण्डीवं कार्मुकश्रेष्ठं वरुणायैव दीयताम् ॥३९॥
ततस्ते भ्रातरः सर्वे धनंजयमचोदयन् ।
स जले प्राक्षिपत्तत्तु तथाक्षय्यौ महेषुधी ॥४०॥
ततोऽग्निर्भरतश्रेष्ठ तत्रैवान्तरधीयत ।
ययुश्च पाण्डवा वीरास्ततस्ते दक्षिणामुखाः ॥४१॥
ततस्ते तूत्तरेणैव तीरेण लवणाम्भसः ।
जग्मुर्भरतशार्दूल दिशं दक्षिणपश्चिमम् ॥४२॥
ततः पुनः समावृत्ताः पश्चिमां दिशमेव ते ।
ददृशुर्द्वारकां चापि सागरेण परिप्लुताम् ॥४३॥
उदीचीं पुनरावृत्य ययुर्भरतसत्तमाः ।
प्रादक्षिण्यं चिकीर्षन्तः पृथिव्या योगधर्मिणः ॥४४॥

* * *

## २. वैशंपायन उवाच

ततस्ते नियतात्मान उदीचीं दिशमास्थिताः ।
ददृशुर्योगयुक्ताश्च हिमवन्तं महागिरिम् ॥०१॥

तं चाप्यतिक्रमन्तस्ते ददृशुर्वालुकार्णवम् ।
अवैक्षन्त महाशैलं मेरुं शिखरिणां वरम् ॥०२॥
तेषां तु गच्छतां शीघ्रं सर्वेषां योगधर्मिणाम् ।
याज्ञसेनी भ्रष्टयोगा निपपात महीतले ॥०३॥
तां तु प्रपतितां दृष्ट्वा भीमसेनो महाबलः ।
उवाच धर्मराजानं याज्ञसेनीमवेक्ष्य ह ॥०४॥
नाधर्मश्चरितः कश्चिद्राजपुत्र्या परंतप ।
कारणं किं नु तद्राजन्यत्कृष्णा पतिता भुवि ॥०५॥

**युधिष्ठिर उवाच**

पक्षपातो महानस्या विशेषेण धनंजये ।
तस्यैतत्फलमद्यैषा भुङ्क्ते पुरुषसत्तम ॥०६॥

**वैशंपायन उवाच**

एवमुक्त्वानवेक्ष्यैनां ययौ धर्मसुतो नृपः ।
समाधाय मनो धीमान्धर्मात्मा पुरुषर्षभः ॥०७॥
सहदेवस्ततो धीमान्निपपात महीतले ।
तं चापि पतितं दृष्ट्वा भीमो राजानमब्रवीत् ॥०८॥
योऽयमस्मासु सर्वेषु शुश्रूषुरनहंकृतः ।
सोऽयं माद्रवतीपुत्रः कस्मान्निपतितो भुवि ॥०९॥

**युधिष्ठिर उवाच**

आत्मनः सदृशं प्राज्ञं नैषोऽमन्यत कंचन ।
तेन दोषेण पतितस्तस्मादेष नृपात्मजः ॥१०॥

**वैशंपायन उवाच**

इत्युक्त्वा तु समुत्सृज्य सहदेवं ययौ तदा ।
भ्रातृभिः सह कौन्तेयः शुना चैव युधिष्ठिरः ॥११॥
कृष्णां निपतितां दृष्ट्वा सहदेवं च पाण्डवम् ।
आर्तो बन्धुप्रियः शूरो नकुलो निपपात ह ॥१२॥
तस्मिन्निपतिते वीरे नकुले चारुदर्शने ।
पुनरेव तदा भीमो राजानमिदमब्रवीत् ॥१३॥
योऽयमक्षतधर्मात्मा भ्राता वचनकारकः ।
रूपेणाप्रतिमो लोके नकुलः पतितो भुवि ॥१४॥
इत्युक्तो भीमसेनेन प्रत्युवाच युधिष्ठिरः ।
नकुलं प्रति धर्मात्मा सर्वबुद्धिमतां वरः ॥१५॥

रूपेण मत्समो नास्ति कश्चिदित्यस्य दर्शनम् ।
अधिकश्चाहमेवैक इत्यस्य मनसि स्थितम् ॥१६॥
नकुलः पतितस्तस्मादागच्छ त्वं वृकोदर ।
यस्य यद्विहितं वीर सोऽवश्यं तदुपाश्नुते ॥१७॥
तांस्तु प्रपतितान्दृष्ट्वा पाण्डवः श्वेतवाहनः ।
पपात शोकसंतप्तस्ततोऽनु परवीरहा ॥१८॥
तस्मिंस्तु पुरुषव्याघ्रे पतिते शक्रतेजसि ।
म्रियमाणे दुराधर्षे भीमो राजानमब्रवीत् ॥१९॥
अनृतं न स्मराम्यस्य स्वैरेष्वपि महात्मनः ।
अथ कस्य विकारोऽयं येनायं पतितो भुवि ॥२०॥

**युधिष्ठिर उवाच**

एकाह्ना निर्दहेयं वै शत्रूनित्यर्जुनोऽब्रवीत् ।
न च तत्कृतवानेष शूरमानी ततोऽपतत् ॥२१॥
अवमेने धनुर्ग्राहानेष सर्वांश्च फल्गुनः ।
यथा चोक्तं तथा चैव कर्तव्यं भूतिमिच्छता ॥२२॥

**वैशंपायन उवाच**

इत्युक्त्वा प्रस्थितो राजा भीमोऽथ निपपात ह ।
पतितश्चाब्रवीद्भीमो धर्मराजं युधिष्ठिरम् ॥२३॥
भो भो राजन्नवेक्षस्व पतितोऽहं प्रियस्तव ।
किंनिमित्तं च पतनं ब्रूहि मे यदि वेत्थ ह ॥२४॥

**युधिष्ठिर उवाच**

अतिभुक्तं च भवता प्राणेन च विकत्थसे ।
अनवेक्ष्य परं पार्थ तेनासि पतितः क्षितौ ॥२५॥

**वैशंपायन उवाच**

इत्युक्त्वा तं महाबाहुर्जगामानवलोकयन् ।
श्वा त्वेकोऽनुययौ यस्ते बहुशः कीर्तितो मया ॥२६॥

* * *

**३. वैशंपायन उवाच**

ततः संनादयञ्शक्रो दिवं भूमिं च सर्वशः ।
रथेनोपययौ पार्थमारोहेत्यब्रवीच्च तम् ॥०१॥
स भ्रातॄन्पतितान्दृष्ट्वा धर्मराजो युधिष्ठिरः ।
अब्रवीच्छोकसंतप्तः सहस्राक्षमिदं वचः ॥०२॥

भ्रातरः पतिता मेऽत्र आगच्छेयुर्मया सह ।
न विना भ्रातृभिः स्वर्गमिच्छे गन्तुं सुरेश्वर ॥०३॥
सुकुमारी सुखार्हा च राजपुत्री पुरंदर ।
सास्माभिः सह गच्छेत तद्भवाननुमन्यताम् ॥०४॥

**इन्द्र उवाच**

भ्रातृन्द्रक्ष्यसि पुत्रांस्त्वमग्रतस्त्रिदिवं गतान् ।
कृष्णया सहितान्सर्वान्मा शुचो भरतर्षभ ॥०५॥
निक्षिप्य मानुषं देहं गतास्ते भरतर्षभ ।
अनेन त्वं शरीरेण स्वर्गं गन्ता न संशयः ॥०६॥

**युधिष्ठिर उवाच**

अयं श्वा भूतभव्येश भक्तो मां नित्यमेव ह ।
स गच्छेत मया सार्धमानृशंस्या हि मे मतिः ॥०७॥

**इन्द्र उवाच**

अमर्त्यत्वं मत्समत्वं च राजञ्श्रियं कृत्स्नां महतीं चैव कीर्तिम् ।
संप्राप्तोऽद्य स्वर्गसुखानि च त्वं त्यज श्वानं नात्र नृशंसमस्ति ॥०८॥

**युधिष्ठिर उवाच**

अनार्यमार्येण सहस्रनेत्र शक्यं कर्तुं दुष्करमेतदार्य ।
मा मे श्रिया संगमनं तयास्तु यस्याः कृते भक्तजनं त्यजेयम् ॥०९॥

**इन्द्र उवाच**

स्वर्गे लोके श्ववतां नास्ति धिष्ण्यमिष्टापूर्तं क्रोधवशा हरन्ति ।
ततो विचार्य क्रियतां धर्मराज त्यज श्वानं नात्र नृशंसमस्ति ॥१०॥

**युधिष्ठिर उवाच**

भक्तत्यागं प्राहुरत्यन्तपापं तुल्यं लोके ब्रह्मवध्याकृतेन ।
तस्मान्नाहं जातु कथंचनाद्य त्यक्ष्याम्येनं स्वसुखार्थी महेन्द्र ॥११॥

**इन्द्र उवाच**

शुना दृष्टं क्रोधवशा हरन्ति यद्दत्तमिष्टं विवृतमथो हुतं च ।
तस्माच्छुनस्त्यागमिमं कुरुष्व शुनस्त्यागात्प्राप्स्यसे देवलोकम् ॥१२॥
त्यक्त्वा भ्रातृन्दयितां चापि कृष्णां प्राप्तो लोकः कर्मणा स्वेन वीर ।
श्वानं चैनं न त्यजसे कथं नु त्यागं कृत्स्नं चास्थितो मुह्यसेऽद्य ॥१३॥

**युधिष्ठिर उवाच**

न विद्यते संधिरथापि विग्रहो मृतैर्मर्त्यैरिति लोकेषु निष्ठा ।
न ते मया जीवयितुं हि शक्या तस्मात्त्यागस्तेषु कृतो न जीवताम् ॥१४॥

प्रतिप्रदानं शरणागतस्य स्त्रिया वधो ब्राह्मणस्वापहारः ।
मित्रद्रोहस्तानि चत्वारि शक्र भक्तत्यागश्चैव समो मतो मे ॥१५॥

**वैशंपायन उवाच**

तद्धर्मराजस्य वचो निशम्य धर्मस्वरूपी भगवानुवाच ।
युधिष्ठिरं प्रीतियुक्तो नरेन्द्रं श्लक्ष्णैर्वाक्यैः संस्तवसंप्रयुक्तैः ॥१६॥

अभिजातोऽसि राजेन्द्र पितुर्वृत्तेन मेधया ।
अनुक्रोशेन चानेन सर्वभूतेषु भारत ॥१७॥
पुरा द्वैतवने चासि मया पुत्र परीक्षितः ।
पानीयार्थे पराक्रान्ता यत्र ते भ्रातरो हताः ॥१८॥
भीमार्जुनौ परित्यज्य यत्र त्वं भ्रातरावुभौ ।
मात्रोः साम्यमभीप्सन्वै नकुलं जीवमिच्छसि ॥१९॥
अयं श्वा भक्त इत्येव त्यक्तो देवरथस्त्वया ।
तस्मात्स्वर्गे न ते तुल्यः कश्चिदस्ति नराधिप ॥२०॥
अतस्तवाक्षया लोकाः स्वशरीरेण भारत ।
प्राप्तोऽसि भरतश्रेष्ठ दिव्यां गतिमनुत्तमाम् ॥२१॥
ततो धर्मश्च शक्रश्च मरुतश्चाश्विनावपि ।
देवा देवर्षयश्चैव रथमारोप्य पाण्डवम् ॥२२॥
प्रययुः स्वैर्विमानैस्ते सिद्धाः कामविहारिणः ।
सर्वे विरजसः पुण्याः पुण्यवाग्बुद्धिकर्मिणः ॥२३॥
स तं रथं समास्थाय राजा कुरुकुलोद्वहः ।
ऊर्ध्वमाचक्रमे शीघ्रं तेजसावृत्य रोदसी ॥२४॥
ततो देवनिकायस्थो नारदः सर्वलोकवित् ।
उवाचोच्चैस्तदा वाक्यं बृहद्वादी बृहत्तपाः ॥२५॥
येऽपि राजर्षयः सर्वे ते चापि समुपस्थिताः ।
कीर्तिं प्रच्छाद्य तेषां वै कुरुराजोऽधितिष्ठति ॥२६॥
लोकानावृत्य यशसा तेजसा वृत्तसंपदा ।
स्वशरीरेण संप्राप्तं नान्यं शुश्रुम पाण्डवात् ॥२७॥
नारदस्य वचः श्रुत्वा राजा वचनमब्रवीत् ।
देवानामन्त्र्य धर्मात्मा स्वपक्षांश्चैव पार्थिवान् ॥२८॥
शुभं वा यदि वा पापं भ्रातृणां स्थानमद्य मे ।
तदेव प्राप्तुमिच्छामि लोकानन्यान्न कामये ॥२९॥
राज्ञस्तु वचनं श्रुत्वा देवराजः पुरंदरः ।

आनृशंस्यसमायुक्तं प्रत्युवाच युधिष्ठिरम् ॥३०॥
स्थानेऽस्मिन्वस राजेन्द्र कर्मभिर्निर्जिते शुभैः ।
किं त्वं मानुष्यकं स्नेहमद्यापि परिकर्षसि ॥३१॥
सिद्धिं प्राप्तोऽसि परमां यथा नान्यः पुमान्क्वचित् ।
नैव ते भ्रातरः स्थानं संप्राप्ताः कुरुनन्दन ॥३२॥
अद्यापि मानुषो भावः स्पृशते त्वां नराधिप ।
स्वर्गोऽयं पश्य देवर्षीन्सिद्धांश्च त्रिदिवालयान् ॥३३॥
युधिष्ठिरस्तु देवेन्द्रमेवंवादिनमीश्वरम् ।
पुनरेवाब्रवीद्धीमानिदं वचनमर्थवत् ॥३४॥
तैर्विना नोत्सहे वस्तुमिह दैत्यनिबर्हण ।
गन्तुमिच्छामि तत्राहं यत्र मे भ्रातरो गताः ॥३५॥
यत्र सा बृहती श्यामा बुद्धिसत्त्वगुणान्विता ।
द्रौपदी योषितां श्रेष्ठा यत्र चैव प्रिया मम ॥३६॥

* * *